Shri Raghunath Temple MSS. Library,
JAMMU

No. १४८१

Title गद्दाधर्यो विशेष निरुक्ति

Author गदाधर:

Extent ११ / २४ Age x

Subject न्याय वैशेषिक

गादाधर्यां विशेषनिरुक्तिः

१४[illegible]१

पत्र २८

अत्र प्रतियोगितावच्छेदकनाशोऽस्य गर्भप्रतियोगिवैयधिकरण्यघटकं तथा च प्रथमा साव्याप्यासहावतारार्हा सत्तावान् द्रव्यत्वादि
साद्यावव्याप्तिः कुतः पश्चादवतारिता। नच पूर्वा व्याप्तिसिद्धिः स्यात्तथा। रूपत्वस्य साध्यत्वेपि द्वित्वावच्छिन्नाभावमादाय व्या
प्तेर्दुर्वारत्वादित्याशयेनेति ६

विरो० श्रीगणेशाय नमः॥ दीधितौ नानाव्यक्तिकेति। ननु नानाव्यक्तिकसाध्यकैकव्यक्तिकसद्धेतुत्वावच्छेदेनाव्या
१ प्तिरित्यर्थो वाच्यः तथा च वह्निमान् धूमादित्यादावव्याप्तिकथनेन न्यूनतेत्यत आह व्यर्थीति। एवं च समाना
मु धिकरणधर्मस्यैव साधनतावच्छेदकत्वपर्यवसानादेकव्यक्तिकत्वस्योक्तस्थलेऽव्याप्त्यभावस्फोरकं त्वेपि
व्यर्थ उद्देश्यप्रदर्शितु हेतुवैयर्थ्यमेव। न चैतद्रूपसमानाधिकरणवानेतद्वृत्तेरित्यादौ एतद्वृत्तित्वेनानेकव्यक्तिहेतुकेऽ
व्याप्त्यभावान्तदावश्यकं। एवमपि शब्दवान् गगनत्वादित्यादावव्याप्त्यभावाद्यधिकरणवृत्तिसाध्यतावच्छेदक
वत्त्वरूपनानाव्यक्तिकत्वस्यावश्यकतयाऽदोषात्तद्वैयर्थ्यस्य दुर्वारत्वात् नानाव्यक्तिकत्ववैयर्थ्यमाशङ्कतेय
२ द्यपीति अव्याप्तेरेवेति एतद्रूपवानेतद्रसादित्यादौ एतद्रूपतद्रूपोभयाभावस्य प्रतियोगितावच्छेदकावच्छिन्ना
धिकरणाप्रसिद्धेस्तादृशप्रतियोगिवैयधिकरण्यासंभवान्नासंभव उक्तः न च प्रतियोगितावच्छेदकावच्छिन्न
वैयधिकरण्यप्रवेशपक्षेपि रूपघटोभयाभावमादायैवासंभवो दुर्वारः तथापि विशिष्टसाध्यतावच्छेदके प्रति
योगितावच्छेदकत्वावगाहिप्रत्ययविषयत्वाभावनिवेशेनादोषादित्याहुः वस्तुतस्तत्तदुभयाननुसंधानेनाव्या
प्तिलिखनं अत एवोभयाभावानुसरण एवासंभवसंगतिः तस्योभयाभावघटितप्रतियोगिवैयधिकरण्यस्य।

१ गर्भप्रतियोगिवैयधिकरण्यानुसरण एवासंभवसंगतिः। प्रतियोगिवैयधिकरण्ये १ २ प्रयोजनाभावेन तत्प्रतियोगितासाक्षीभूत
१ प्रतियोगितावच्छेदकनिवेशप्रथमाव्याप्तिः। द्वितीया तत्र तन्निवेशेऽपेक्षा १ २ नन्विदं तदानीन्तनलक्षणस्यावच्छेदकत्वघटितत्वात्
१ दपिधानमित्याशयेन समाधत्ते तथापीति १

२ नुत्वेनापितत्सिद्धिर्नतुतद्व्याप्येनपृथिवीत्वादिनैवेतिभावः॥२

स्यचेति।

तौस्वरूपत्वस्यच॰ ननुरूपसाध्यतामतेवाधादौद्रव्यत्वादिनानतत्सिद्धिः॰ व्यभिचारित्वात् तत्समवायसा
ध्यत्वेऽपितेननतत्रतत्सिद्धिप्रसंगादित्यत्रेष्टापत्तिमाह तन्मतेऽपीति॰ परंपरासंबंधेनरूपत्वेनकिंचिद्दूषितत्वतः
साध्यमानमितिसमवायादिनेतिरूपस्यसंसर्गत्वेसमवायादेरप्यभानापत्तिरितिलाभाय॰ तदुपपत्तये॰ समवा
येनरूपनिष्ठविधेयतोपपत्तये॰ विधेयतापीतिरूपमनुमिनुरानोमीत्यनुव्यवसायस्यागत्याभ्रमत्वंस्वीका
पि र्यमितिभावः॰ व्याप्यवृत्तिसाध्यकेप्रतियोगिवैयधिकरण्यस्याप्रवेशाद्दूषणमेतिअन्यथावाधानवतारदशा
यामापत्तेरिष्टत्वे॰ विशेषणेत्यत्रविशिष्टाभावः विशेष्यनिष्ठप्रतियोगितावगाहिप्रतीतिकः॰ विशेषणा
वच्छिन्नविशेष्यत्वानवच्छिन्नाऽसंभवत्प्रतीतिकत्वादितिप्रयोगोबोध्यः॰ सत्तागुणत्वोभयेऽस्तीति॰ सत्तागुणत्वयो
र्विरुद्धत्वग्रहदशायांयोधर्मोभासतेतेनरूपेणसाध्यतायामित्यर्थः॰ तेनतत्रापिविशिष्टत्वमेवसाध्यताव
च्छेदकमितिशंकाव्युदासः अभावांतरंगुणत्वाभावः उभयाभावेति॰ साध्यतावच्छेदकसंबंधसामान्येयाद
शप्रतियोगिताश्रयप्रतियोगिकत्वहेत्वधिकरणानुयोगिकत्वोभयाभावः साध्यतावच्छेदकसंबंधावच्छिन्ना
नुयोगितासामान्येयादृशप्रतियोगिताश्रयीयत्वहेतुमद्वृत्तित्वोभयाभावोवानिवेश्यः॰ ननुसर्वत्रापिविशि

२दित्यादावु

वि०टी एवैशिष्ट्यानुमितिस्वीकारे शुद्धसमवायादिनानुमित्युच्छेदः स्यादित्यंत आह विशिष्टेति तथाच सत्तावानद्र
२ व्यत्वादावुपलक्षितसाध्यकानुमितौ नोभयाभावघटितप्रतियोगिवैयधिकरण्यं विवक्षणीयमिति भावः
कथितइति सत्तागुणत्वोभयाभावस्य सत्तारूपप्रतियोगिसमानाधिकरणतयाऽव्याप्त्यभावमादाय स्यादिः
उक्तरीत्येति· तस्य विशिष्टप्रतियोगिकसमवायेन प्रतियोग्यनधिकरणे हृदधिकरणकत्वात्· परिष्कार
प्रकारः प्रतियोगितावच्छेदकानिवेशरूपः तथापि सत्तावान् विशिष्टसत्तावान्वा द्रव्यत्वादित्यादावव्या
ने प्तिव्याप्त्योरसत्त्वेपि· धूमादित्येति रूपसर्वविधेयत्वापुत्त्वापत्त्वनुचितइत्याशयेनेदं· स्वपदस्य हेतुता वच्छेद
वच्छेदकावच्छिन्नपरत्वेन तद्धेतुपरत्वं वाच्यापेधूमादिनेति· द्वितीयेपर्वतीयेति अत्र समानाधिकर
णयोरेवेति नियमोप्यनुगृह्यते· व्याप्तिपदार्थत्वमपि निराकरोति धूमइति· समभिव्याहृतपदार्थता
वच्छेदकावच्छिन्नव्यापकत्वघटितस्यैव व्याप्तिपदार्थत्वात्· येत्वपर्वर्वन्ह्यनुमानमुपपादयितुंरूप त्यः
वान्पृथिवीत्वादित्यादौ सत्तावान्द्रव्यत्वादित्यादौ तत्तद्रूपाभावविशिष्टाभावोभयाभावादिवार
कं परिष्कारमाहुस्तमुपन्यस्यति यत्त्विति· सामानेति संयोगीसत्त्वादित्यादावतिव्याप्तिवारणाय हेतुस

हेतुसमानाधिकरण्याभावोलोकेपिसंयोगीसत्त्वादित्यादावव्याप्तेर्हेत्वधिकरणावच्छेदेनेति· रूपसा
मान्याभावादौसाध्याभावनिष्ठसाध्यसामानाधिकरण्याभावोनहेत्वधिकरणावच्छिन्न इति निर्व्या
प्तिः हेतुसामानाधिकरणसाध्यसामानाधिकरण्यशून्याभावाप्रसिद्धेः साध्याभाववत्त्वेति व्यभि
चारिपरेण साध्याभाववत्संग्रहाय साध्यसामानाधिकरण्यपनिवेशः· अत्र साध्यतावच्छेदकविशि
ष्टाधिकरणत्वं प्रवेश्यं· तेन विशिष्टसत्त्वाभावस्य जात्यधिकरणावच्छेदेन साध्यसामानाधिकरण्ये
पि न सत्त्वादेर्न विशिष्टसत्त्वत्वे सदित्यादिना जातिव्यापकताप्रसंगः एवं च यादृशरूपविशिष्टसाध्याधि
करणत्वं व्यापकताघटकं तादृशरूपेणैव साध्याभाववत्त्वमिति नियमात्कदाचिद्वह्निमान्कदाचिद्व
ह्नित्वाद्वानित्यनुमितिरिति· नियमनिर्वाहः न वा व[illegible]न्याभावनिष्ठं यद्वह्निसामानाधिकरण्यं त
च्छून्यस्याभावस्याप्रतियोगी महानसीयवह्निरिति प्रमायाः महानसीयवह्नित्वादिना व्यापकतावगा
हित्वेपि नाभांनतस्य धूमादिसामान्यलिंगकमहानसीयवह्नित्वाद्यवच्छिन्नविधेयताकानुमितिप्रसंगः
सामानाधिकरण्यरूपवैशिष्ट्यनिवेशे गौरवादाह साध्याभाववत्त्वेति हेत्वहेत्वधिकरणावच्छेदेनेत्यनु

वि॰ दी २ वर्त्तते॰ सामानाधिकरण्यस्य व्याप्यवृत्तित्वेतु साध्याधिकरणनिष्ठसाध्याभावाधिकरणान्यहेतुमन्निष्ठा
धिकरणताकाभावेत्यभावांतार्थः॰ तत्तद्रूपाभावोरुभयाभावाद्यधिकरणत्तानांव्युदासान्नाव्याप्तिः॰
३ अत्रापियेनरूपेणसाध्यस्यव्यापकत्ताघटकत्तातेनरूपेणैवसाध्यानुमितिरितिनियमाद्वह्निमान्
वह्नित्ववद्धानित्यनुमित्योर्व्यवस्थयानिर्वहिः॰ नवावह्न्याधिकरणनिष्ठवह्न्यभावाधिकरणतान्यधू
रि मवन्निष्ठाधिकरणताकाभावाप्रतियोगीमहानसीयवह्नित्यादिप्रमायाः महानसीयवह्नित्वेनव्यापक
तावगाहित्वेपिनधूमसामान्यलिंगकमहानसीयवह्नित्वावच्छिन्नसाध्यकानुमित्यापत्तिरितिः अन
नुमेयत्वात् अनुमेयत्वानंगीकारेप्यसतेः॰ वस्तुमात्रएवेतिस्वरूपादिसंबंधेनसाध्यतास्थलेनुतत्सं
बंधेनवर्त्तमानप्रमेयत्वादेरेवव्यापकत्वोपपादनेनैववक्तार्थत्वात्॰ रूपवान्पृथिवीत्वादित्यादौ ला
तत्तद्रूपाद्यभाववारणायापूर्ववह्न्याद्यनुमानोपपत्तयेचस्वयमवच्छेदकत्वाघटितलक्षणंपरिष्क
रिष्करोतियद्वेति॰ हेत्वितिहेत्वधिकरणावच्छेदेनाभावेइत्यर्थः॰ नायंदोषइति॰ तादात्म्येनप्रमेयसाध्य
केघटाभावादेस्तद्भिन्नभेदात्मकत्वेपिगगनाद्यभाववत्त्वोल्लभ्यात्॰ यत्तुसमवायावच्छिन्नप्रतियोगिता
२

कप्रमेयाभाववत्सोऽलभ्यमितितन्न तद्भिन्नभेदात्मकतया तन्यात्तदसंभवात् स्वरूपसंबंधेन प्रमेय
साध्यके तु गगनाभावादेरपि कालिकसंबंधावच्छिन्नस्याभावस्य योविशेषणतासंबंधावच्छिन्नाभावस्व
रूपत्वेऽपि साध्यवद्वृत्तित्वस्य स्वरूपसंबंधेन वाच्यत्वाद्यभावात्मक एवाभावः प्रसिद्धः घटभेदादेर्निरुक्तप्रमे
मेयाभाववत्त्वाभावादाह भेदानात्मकस्येति साध्यतेति अन्यथा समवायेन वह्न्याद्यभावमादायासंभवा
पत्तेः विवक्षितत्वादिति नचैवं साध्यनिष्ठत्वं व्यर्थं तस्य परित्याज्यत्वात् तर्हि तदुपादानं किमर्थं एवं प्र
मेयवान् वाच्यत्वादित्यादौ साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसाध्यसामानाधिकरण्यनिवेशेना
प्रसिद्धिः परिहृता प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशात् इदानीं तु न तथा वक्तुं
शक्यं अवच्छेदकप्रवेशापत्तेः किंतु साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वमेव तथा च समवा
यावच्छिन्नतत्तद्रूपाभावादिषु साध्यसामानाधिकरण्यमेवेत्यावेदनार्थमेव तस्योपादानात् एवमिति
ण अत्रापि अभावे साध्यविशेषणं व्यर्थं एवं तादृशाभावीयप्रतियोगितासामान्ये साध्यतावच्छेदकसंबं
धावच्छिन्नत्वस्य वृत्तित्वोभयाभावो निवेश्यः तेन न तादात्म्येन प्रमेये साध्ये समवायावच्छिन्नप्रमेयाभाव

वि० टी० स्यघटादिमेदीयत्वसाध्यवदनुयोगिकत्वोभयाभावावदधिकरणताकस्यसाध्यतावच्छेदकसंबंधा
४ वच्छिन्नप्रतियोगित्वाप्रसिद्धावपिनक्षतिः· अधिकरणविनिर्मोकेणाभावाभावादौयद्रूपेति· विशेष्य हृ२
५ संबंधितावच्छेदकत्वलाभायावच्छिन्नपदं· एवंसर्वत्र· नन्विति प्रत्ययादित्यसंगतं तस्यासाधकत्वादित्य
तआह इत्याकारकेति· तथाचानुव्यवसायकारणतात्वहेतुकमनुमानं नतत्साधकमितिभावः· यद्वाता
दृशप्रत्ययःसाध्येतादृशप्रतियोगित्वाभावावगाही· तादृशावगाहित्वप्रकानुरक्तोव्यवसायविषय तु५
त्वात् तदभावनिरूपितत्वेनगृहीततद्धर्मनिष्ठावच्छेदकतानतदभावानिरूपिता· तन्निरूपितत्वात् ता
दृशावगाहित्वानुपगमेतादृशावगाहित्वेनानुव्यवसायानुपपत्तेरितिदृष्टव्यं शब्देति स्वरसतोयादृ
शशब्दादितिनियमात्· नदवच्छेदकतापृथिवीनिष्ठाभावप्रतियोगितावच्छेदकता· विरोधीति· विरो त्वाभावा
धिद्वयावच्छेदकत्वयोः परस्पराभावानात्मकत्वेपिनक्षतिः· प्रतियोगितावच्छेदकत्वं प्रतियोगित्वा
भावावच्छेदकावन्नितद्व्येदमितिग्रहस्यैववाधकत्वात्· वस्तुतस्तुप्रतियोगितावच्छेदकत्वग्रहेण
प्रतियोगित्वाभावावच्छेदकताग्रहेऽप्रामाण्यमेवासंजनीयं· न च तदभावावच्छेदकत्वाप्रसिद्धावपितद् ४

६ दीधितौ सामानाधिकरण्येति हेतुनिष्ठे साध्य :।६ वगाहित्वाद्याप्यतदु ९

र्मनिष्ठावच्छेदकतायां तदभावा [redacted] निरूपितायां तदभावनिरूपितत्वोपहितत्वं । तदपेक्षयोक्तप्रत्ययस्यान
तिरिक्तवृत्तित्वरूपतदभावावच्छेदकतावगाहित्वमुपगम्य तदविरोधित्वमेवोचितमिति भावः । उभयेति प्रति
योगित्वतदभावसिद्ध्यविरोधित्वादित्यर्थः । विलक्षणमेव प्रतियोगित्वाद्यवच्छेदकत्वं भिन्नमेव । कष्टेति । धर्मि
तावच्छेदकघटकतया वह्नित्वादेर्यादृशं भानं तादृशमेवानुमितौ भानमिति नियमांतरमुपगम्येत्यर्थः । विरु
द्धद्वयेति तत्र दंडी दंडिसंयोगादिमन्निष्ठाभावप्रतियोगी न दंडीति प्रत्ययादित्यर्थः । इष्टापत्तीति तावतापि
घटत्वादौ कार्यतावच्छेदकत्वाध्वंसतेः असमानाधिकरण इति अयं च बहुव्रीहिगर्भो बहुव्रीहिरिति प्रथमं
समानमधिकरणं यस्येति बहुव्रीहिः कार्यः । अधिकरणवृत्तित्ववानिति समासार्थः । न विद्यते समानाधिक
रणो यस्येति विग्रहस्य यत्सामानाधिकरण्याभाववानित्यर्थः । किंचिन्निष्ठाभावप्रतियोगिसामानाधिकरण्य
वानिति समासार्थः । किंचिद्विशेषणविशिष्टप्रतियोगितानि । प्रसक्तेरकिंचित्करतालाभाय वह्निवृत्तीति तथा च
लक्षणे साध्यतावच्छेदकावच्छिन्नतावच्छेदकाश्रयप्रतियोगिताकसामानाधिकरण्यनिवेशान्न दोषः । अन्य
(था गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तेरनुद्धारापत्तेः । पारिभाषिकावच्छेदकत्वविवक्षावैयर्थ्यं)

वि॰ त्रे
५

२साध्यसजातीयशब्दस्य

मित्याहातएवेति॰ स्वविशिष्टेति॰ अन्यथा विशिष्टसत्तासाध्यकजातिमत्याद्यौ स्वशब्देन साध्यतावच्छेदकोपा
दानानुपपत्तेः॰ यदि साध्यवृत्तिसाध्यतावच्छेदकवदित्यर्थः तदा तत्तत्साध्यप्रवेशापत्तिरतः सामानाधिकर
ण्येन एवस्तदवच्छिन्ननिरूपयितत्वप्रवेशात्साध्यवृत्तित्वं व्यर्थमित्याहन्नेनेति॰ सामान्येति सामान्यलक्षणानं
गीकारेपि महानसीयोतादृशधूमत्वरूपव्याप्यनुभवेन तादृशधूमत्वरूपायाः स्मृतव्यासेः पर्वतीयधूमे पर्व
तीयवह्निसंनिकर्षाभावेपि भानसंभवादितिभावः॰ स्वेति॰ विधेयत्वेनाभिमतं परामर्शीयविषयतायास्तवसा
ध्यनिष्ठविधेयताप्रयोजकत्वादुक्तं ननु तद्यक्तित्वेन निवेशःभ्रमः कार्यः पूर्वमते तस्या एवस्वावच्छेदकसा
ध्यतावच्छेदकत्वादिसंबंधेन प्रयोजकत्वंनच पूर्वमते वह्नित्वादिना घटादिपरामर्शाद्वह्नित्वादिना घटाद्यनुमा
नानुपपत्तिरितिवाच्यं॰ परामर्शीययद्धर्मावच्छिन्नयद्विषयतायाः तद्धर्मावच्छिन्नतत्सजातीययावन्निष्ठविधेय
ताप्रयोजकत्वस्वीकारात्॰ यदि च वह्नित्वेन घटपरामर्शाद्दोषनाशबलेन वह्नित्वेन वन्ह्यनुमितिस्तदा प्रथ
मोक्तं प्रयोजकमप्यादरणीयमितिदिक् धूमव्यापकवन्हिसमानाधिकरणधनवानिति ज्ञानस्य कारणता
वारणाय हेतुतावच्छेदकपुरस्कारेण व्याप्तिज्ञानकारणतां उपेत्य हेतुतावच्छेदकस्यापि व्याप्तिपदार्थत्व

मंगीकृतं तस्मादयत्तिसाधनतावच्छेदके स्फुटिति· नयेति महानसएव धूमनिष्ठतादृशसाध्यसामानाधिक
रण्यत्वेन सकलव्याप्तिज्ञानसंभवात्पक्षसमीपस्थेन संनिकर्षासत्त्वेपि वृ· पर्वतीयसाध्यसामानाधिक
रण्यस्मरणसंभवादिति भावः आग्रहेति अत एव यद्धेतिकल्पस्य द्वितीयतासंगच्छते व्याप्तिस्वरूपला
घवान्· तथाभिधीयेतेति यद्वदित्यत्र यद्धर्मावच्छिन्नत्ववदित्यभिधीयेतेत्यर्थः· साध्यतावच्छेदकाभिधा
नानभिधानाभ्यामेव तद्रूपेण साध्यतात्पर्यविषयाप्रवेशप्रकाशनादिति भावः तेन समं सामानाधिकरण्यमित्य
स्य तद्वृत्तित्वमित्यत्रैव तात्पर्यं त्वाहेदमिति· यद्यपि तेने त्यत्र आधेयतासंबंधेन यद्वृत्पदार्थान्वय उच्यते तत
दाविशिष्टपरामर्शीनिर्वाहे पि गौरवं बोध्यं· नन्वेतद्वृत्तियावद्धर्मवानेतत्त्वादित्यादौ नाव्याप्तिः नन्वनाना
व्यक्तिरधिकरणं यस्य साध्यस्येत्यर्थः· द्रव्यमेतत्त्वादित्यादावव्याप्तिविरहात् व्यक्तिपदस्य साधनाधिकर
द ण्यपरत्वेपि द्रव्यं घटादित्यादावव्याप्तिविरहात् अत· नानाव्यक्तिः स्वरूपं यस्येत्यर्थे साध्यस्येत्यपीत्याशयवानाह
नानेति व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वोक्तौ वह्निमानेतद्धूमादित्यादौ अव्याप्त्यभावात् साधना व
धिकरणनानावृत्तित्वेन व्यधिकरणद्वयं विशेषितं· यद्रूपावच्छिन्नेऽवच्छेदकभेदविरहादाहावच्छेदकता

वि० शे०
१६
६

भावववदिति॰ अतिव्याप्तेरिति किंचिद्विशेषितसाध्यतावच्छेदकावच्छिन्नेऽवच्छेदकत्वाभावसत्वात्‌॰ अविशे
षितेति॰ निरवच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकताकरतादृशावच्छेदकत्वाभावस्येत्यर्थः॰ तद्व्यक्ति संयो
गवान्धूमादित्यादौ तद्व्यक्तित्वस्य साध्यतावच्छेदकत्वेऽपि वन्हीतरावृत्तित्वे न तदवच्छिन्नभेदस्य हेतुसामाना
श्र धिकरण्यादतिव्याप्तेराह॰ विशेषितेति॰ तथाचाभासस्य दृष्टान्ताभावः॰ एकेति॰ कपिसंयोग्येतत्वादित्या गीए
दौ हेतुसमानाधिकरणसाध्यस्य हेतुव्यापकतया लक्षणसंगतिरित्यर्थः॰ वन्हिस्तद्व्यक्तित्वादित्यादौ तद्व्यक्ति
भेदमादायाव्याप्तिवारणाय भेदः प्रतियोगितावच्छेदकताश्रयासमानाधिकरणत्वेन विशेषणीयः॰ तद्व्यक्ति
र्वन्हित्वादित्यादौ च तद्व्यक्तिभेदस्य प्रतियोगितावच्छेदकीभूतवन्हित्वसमानाधिकरणत्वेऽपि तद्व्यक्तिभेद
मादायैव तद्व्यक्तित्वेऽव्यापकत्वमुपपादनीयं स्वरूपतो वन्हित्वादेस्तद्व्यापकत्वमिष्टमेव॰ अन्यथा तु ता
दृशभेदप्रतियोगितावच्छेदकत्वाभावे साध्यताव्यापकत्वं निवेश्य अविशेषितसाध्येऽनवच्छेदकत्वविव
वक्षणेनातिव्याप्तिरित्यत आह॰ विशेषितेति॰ साध्यतावच्छेदकवद्यत्तन्निरवच्छिन्नतादृशावच्छेदकत्वा
भाववदित्यर्थे इत्यार्थममभिप्रेत्याह तस्य चेति॰ अविशेषितस्यानवच्छेदकत्वमिति यथाश्रुतप्रवादमनुरु
५८

ध्याह वस्तुतस्त्विति· तत्त्वमिति एतेनोत्तरलक्षणेऽप्यव्याप्तिर्भवेत्तावच्छेदकभेदनिवेशासंभवः सूचितः ननु म
हानसीयवह्निमद्भेदस्य हेतुसमानाधिकरणत्वादव्याप्तिरत आह महानसीयेति· यत्रेति वह्निसंयोगव
न्नूधूमादिस्थ्यादौ· यत्र च· वह्निसंयोगवद्वान्धूमादिस्थ्यादौ उक्तदोषः प्रथमे तद्वह्निसंयोगस्याप्येव वह्नित्वेन
तद्वह्निसंयोगवद्भेदस्य तद्वह्निसंयोगवति साध्ये च वह्नित्वेन तद्वह्निसंयोगाश्रयवद्भेदस्य हेतुसामाना
धिकरण्यादतिव्याप्तिरूपः· तात्पर्यमिति एतेन नन्वेवमिति शंकापूर्वतीय धूमे तद्वह्निव्याप्यग्रहादनुमा
नानुपपत्तिपराः सर्वे त्यादिसमाधानं सामान्यलक्षणसद्भावमभिप्रेत्य· धूमसंबद्धवह्निः एदैंधनजद्
तिमूलार्थः सूचितः· सूचनादिति साध्यसमानाधिकरण्याभावे यो हेतुस्तदभावसामानाधिकरण्यं तत्क
यन्नोल्लिखो यस्या इति विग्रहः· उल्लेखस्तद्बोधकत्वेनाभिमतशब्दः· शेषस्त्वन्यपदार्थः संबंधः इत्याशयेना)
ए३ हविर्मन्त्वितितात्पर्यमित्यनुषज्यते तत्र व्यधिकरणयोः· विशेषणेन तरं प्रतियोग्यवच्छिन्नादि अनुभूयमा
नो विशिष्टभेदो ४मुखेनेत्यर्थः· शिष्टेति· वाक्यार्थज्ञानेति मूले महीरुहो विहंगमसंयोगीनेति वाक्यप्र
तिसंयोगाभावप्रतीतिरेव प्रयोजिका· शब्दमूलटिप्पण्यां वाक्यार्थज्ञानत्वेन हेतुतां निराकृत्य प्रयोज

४ मुखेनेत्यर्थः

१ लेखो यस्या इति विग्रहः उल्लेखस्तद्बोधकत्वेनाभिमतशब्दः शेषस्त्वन्यपदार्थः संबंध इत्याशयेनाह विशि ष्टेतिलादशेतिविशिष्टभेदबोधकेत्यर्थः १

वि० टी० कतायाः स्वीकारात्‌· बाधकेति बाधकासत्त्वे विशिष्टध्वंसविषयकत्वमेवेत्याविष्करणाय· तन्नष्टइति तथा
७ चशिखाविनष्टइति प्रतीतिर्न शिखिध्वंसविषयिणी शिखिनिष्ठविनष्टत्वप्रमाविषयविरुद्धार्थविषय
कत्वादिति प्रयोगः· प्रतीत्यंतरविरोधादेव विशेषणाभावविषयकत्वोक्तेरग्रिमं बाधकपदं तत्परतया
व्याख्येयं तथा सति यत्रेत्यादावनन्वयपरीहाराय आसयत्रेत्यादि· यथा भेदस्याव्याप्यवृत्तित्वं तथा तदभा
वस्यापीति दृष्टांतदार्ष्टांतिकयोरूपदर्शने किं फलमित्याकांक्षायामाह प्रतियोगिनइति नबाधक
मिति संयोगाभावादेव कुत्र व्याप्यवृत्तितायाः संयोगाघ~~तत्त्वव्यत्यय~~ व्याप्यवृत्तित्वनिबंधनायादृ
ष्टत्वात् संयोगस्य निरवच्छिन्नवृत्तिकता दृशाभेदाभावरूपता कथमित्याशंकोच्छेदाच्च स्वमतेने
ति युज्यते चेत्त्वादिना के पि संयोगावच्छिन्नभेदाव्याप्यवृत्तितायाव्यवस्थापनीयत्वात् व्यवस्थापना
येति· यद्वत्त्वग्रहप्रतिबंधकीभूतग्रहविषयोपस्य तदभाववएवेति नियमं परिष्कृत्य तिशेषः· प्रतियो
गिनइति तज्ज्ञानप्रतिबंधकज्ञानप्रकारत्वे यदि अभावाभाववत्त्वं बीजं स्यात्तदा तेन तत्साध्येत न त्वे
तत्त्व स्वार्थः तन्नु स्वाभावज्ञानप्रतिबंधकज्ञानविषयत्वे स्वाभावाभावत्वमिति नियमम पिनिर ७

१स्वाभावज्ञानप्रतिबंधकज्ञानविषयत्वे१

प्रत्यक्षे घटाज्ञानस्य

स्यतिग्राह्यभेदे नेति॰ अभावेति प्रतियोगिज्ञानस्य व्यवहर्त्तव्यज्ञानविधया ऽभावव्यवहारे उपयो
गो बोध्यः॰ तेन हेतुनेति घटस्य घटाभावाभावव्याप्यत्वेन तज्ज्ञानस्य व्याप्यत्वेन ज्ञानविधयानुमिति व
हेतुत्वादिति भावः॰ आनुमानिकमभावाभावज्ञानमुपपाद्य प्रात्यक्षिकं तदुपपादयति क्वचिदिति॰
प्रत्यक्षे घटज्ञानसामग्रीसत्त्वे घटाभावाभावस्यापि ग्रहसंभवात् घटाभावसंशयापसारकतयो
पयोगः॰ अवच्छेदकधर्मः प्रतियोगितावच्छेदकधर्मः॰ क्वचिन्नैष्ठेव पाठः॰ मयेति मया संयोगावच्छे
दकावच्छेद्यत्वोपगमादिति भावः॰ विशेषणव्याप्यवृत्त्यप्रतियोगित्वं॰ प्राथमिकेति भेदः॰ प्रतियोगिता
वच्छेदकविरुद्धवृत्तिचन प्रथममवधृतं येन भ्रमत्वस्यादिति भावः॰ अवच्छिन्नेति अवच्छिन्नप्रतियोगि
ताकत्वविशिष्टसामानाधिकरण्यसंबंधेन घटत्वादिधर्मवत्त्वस्य घटासत्ताभावादेः प्रसिद्धिः॥ घटभेदा
दौ घटत्वपटत्वविशिष्टत्वावारणायोभयसंबंधनिवेशः न च सामानाधिकरण्येति॰ कालिकसंबंधेन
घटत्ववति घटभेदसत्त्वात्प्रतियोगितावच्छेदकताघटकसंबंधेन स्वाधिकरणप्रवेश्यसमवायेन घ
टत्ववति कालिकसंबंधेन घटभेदसत्त्वात्स्वरूपसंबंधेन तद्वृत्तित्वनिवेशपरं च कालिकसंबंधे

बि॰ शे॰ नघटत्वविशिष्टभेदस्यघटत्वनिष्ठाया अवच्छेदकतायाः कालिकसंबंधे अवच्छेदकतासत्वान्नतद्वार
८ णमितितन्नेद्रेदप्रतियोगितावच्छेदकताघटकसंबंधनिवेशआवश्यकइतिनसर्वसाधारणमित्यर्थः
स्वरूपसंबंधेनवृत्तिप्रवेशेविषयतासंबंधेनघटत्वाभावविशिष्टोयःतद्भिन्नभेदेघटत्वाभावरूपेता
वृ४ दृशनिर्विषयकवृत्तित्वसत्वात् वृत्तित्वसत्वादाहस्वावच्छेदकेति नहिसर्वमपिज्ञानंघटत्वाभावविष
यकमितितथाविधविषयतासंबंधेघटितसामानाधिकरण्यप्रसिद्धिः इदंतुचिंत्यंनतुकालिकसंबंधे यद्यपि
नघटत्वविशिष्टभिन्नभेदेनादृशभिन्नंनित्यमेवतत्रतथाविधकालिकसंबंधेनवृत्यप्रसिद्धिः एवं
सत्तावद्भिन्नभेदेपिसमवायसंबंधावच्छिन्नवृत्त्यप्रसिद्धिरिति· इदंतुबोध्यंसंयोगिभेदस्याव्याप्य
वृत्तित्वोपगमेपिसामान्यतोविरोधानिर्वाहोस्येवसंयोगिभेदेद्रव्यभेदस्याधिकरणभिन्नसंयोगिभे
मे दात्मकतयाद्रव्यभेदत्वरूपानुयोगितायांशवृत्तत्वाश्रयनयातद्भत्वस्यसंयोगिभेदेसत्वात् त
थाप्यत्यंताभावाधिकरणकाभावस्येवतत्स्वरूपत्वेनान्यस्येतिसिद्धांतमनुरुध्यतथोक्तं· बाधकस
त्वे· वृक्षःकपिसंयोग्यभिन्नइतिज्ञानस्यप्रतिबंधकस्यसत्त्वाबं· कल्प्यतइतिध्येयंरजतत्वप्रकारक ८
पक्षतयापिघटाद्यत्यंताभावप्रतियोगितामादायतद्धि

३ शून्यत्वादिरूपा विनष्टकम्म इत्यादौ श्रूयमाणमतर्थान्वितविनाशस्यैव प्रतीत्सहलयाशिखा। नाशाप्रतियापत्तिरन्तरत्वोवि
शेषं प्रदर्शयितुं भावं प्रदर्शयति अयं भाव इति। तस्याः ३

प्रतीतिः रजतत्वाभाववद्विशेष्यिकारजतत्वबाधप्रमाविषयविरुद्धार्थकत्वात् इतिक्रमेण। रजतत्वे ६
परं गत्वयोरजतत्वशाब्दोपस्थाप्यत्वासंभवान्नथावक्तुमशक्यत्वेपि नञः संसर्गाभावान्योन्याभावो
भयार्थकत्वाद्बाधकवशाद्भेदस्यार्थं विहाय संसर्गाभावार्थकत्वेन निषेद्धुमर्हत्युक्तो भावं प्रदर्शयति अ
यं भाव इति। इदं रजतमित्याकारकप्रतीतेः तन्मूलेति प्रत्यक्षप्रतीतो औत्तरकालिकव्यवहारादन्य
स्यान्योन्याभावसंसर्गाभावान्यतरविषयकत्वरिश्चापकस्यासंभवात्। सप्तमीद्वयमिति पाठे अन्य
कालीनेत्यादि हेतोन न्यूनता। पदद्वयानीमिति परं। वाच्यत्वादिति तथा च गौरवमेव तन्मते इति वो
ध्यं आधेयतायाः प्रकारत्वे तु न गौरवं शाब्दबोधेऽधिकविषयकत्वस्यानुगुणत्वात्। इतरेति नञर्थेत
रेत्यर्थः। आभासनिराकरणानुरोधेनञ्चार्थे विशिष्टपरेति। अभाववत्तित्वेन प्रतियोगितायां अस
बंधत्वादाह प्रतियोगीति। प्रतियोगिपदादिति प्रतियोगिपदानुपस्थाप्यं यत्कारकपदानुपस्थाप्यं तस्य
वृत्तिशब्दैकदेशोपस्थाप्येन नान्वयः इत्यर्थः। वृत्तित्वं कृदन्ततद्धितांतसमासाद्यन्यतरमत्वं। अन्व
यः तद्विषयता निरूपितशाब्दबोधीयविषयत्वं। चैत्रस्य दासभार्येः शरेः शातित्र पत्र इत्यादौ विभक्त्यर्थ

६ घटादावित्यादि सप्तमीरूपमपि व्यवहारान्वपि अधिकरणीमविषयत्वर्थकमेवनत्वाधिकरणार्थकं बाधात् ६
४ दंडिपदं न विशिष्टवाचकं नापि दंडोपस्थापकं मतो ४

तत्प्रत्ययानतिरिक्तस्योत्तरवर्तिप्रत्ययानधिकरण ४

वि॰ श्रे
६
१
निरूपितत्वकरणत्वपार्यतं त्रेणैवेत्यशार्थयोः वृत्तिशब्दैकदेशोदासत्वशात्तनादावन्वयबोधोदया
दुद्देश्यतावच्छेदककोटौ विशेषणद्वयं प्रतियोगिपदाद्यव्यवहितोत्तरविभक्त्यनुपस्थाप्यत्वं चावि
वक्षितं कारकविभक्तिः रूपरूपधात्वनुयोगे कर्मषष्ठी प्रकृतित्वं स्वाव्यवहितपूर्ववर्तिपदत्वं स्वेन
तत्प्रत्ययः प्रत्ययान्तरेत्ति स्वाधिकरणक्षणध्वंसाधिकरणतत्प्रत्ययप्रागभावाधिकरणतत्प्रत्ययाति
रिक्तसजातीयप्रत्ययानधिकरणैकत्वमर्थः अत्राधिकरणं तं तत्प्रत्ययविशेषणं दंडिनावित्यादौम
स्योत्तरवर्ती तुपः प्रकृतित्वार्थं तत्सजातीयेति तादृशाधिकरणत्वावच्छेदेन प्रत्ययान्तरानधिकरणत्वं निवेश्यं ते
नचैत्रस्य पुत्रावित्यादौ न चैत्रादौ द्वित्वाद्यन्वयप्रसंगः न्वयपदांतरव्यवधानाभाव एव कुतो नोक्तः तथा
सतिस्वाधिकरणक्षणध्वंसाधिकरणतत्प्रत्ययप्रागभावाधिकरणपदांतरानधिकरणकत्वं तत्प्रक
दा तित्वं एवं च राजपुंसर्षावित्यादौ राजादौ द्वित्वाद्यन्वयो न स्यात् तत्पदस्य पदांतरव्यवहितत्वेन तदप्र
कृतित्वादिति सकलेति वृत्तिशब्दैकदेशोपस्थाप्यमात्रेणनान्वयइति विवक्षितं निष्कर्षे सूत्र्यः ए
कधेतिभानेनान्वयि हेतुरिति अन्यत्र विशेषणत्वेनानन्वये इत्यादीति आदिनापटीनश्यामेसादौ ६

[गादि]

स्त्रीलिंगतानुपपत्तिः आशङ्का नानुपमृद्येति अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावादिति शून्यत्व
स्योपादानत्ववादिनां सूत्रं तदर्थः कार्याणां भावानामभावादेवोत्पत्तिः यतोऽङ्कुरादिकमनुपमृद्य बी [कुरा]
जादेः प्रादुर्भावस्योत्पत्तेरभावात् तथा च बीजादिनाश एवांकुरादेरुपादानमिति वेद्येति दूषणं तार्थ
मिदमुक्तमिति भावः संबंधः आधाराधेयभावादिः आधेयसामान्याभाववति नञोऽत्र तेरनुपप [त]
त्तावपीति योजना विशिष्यतामिन्नत्वे संसर्गिकविषयतात्वपरिचायकं साध्यादेरिति पूरणं आदिना हेतुग्रहः
किं साध्यहेतुकानुमितिप्रयोजकं किमिति प्रश्नार्थः काविन्यसाकांक्षाभयादाह घटपटावितिकर्षविदित्ति द्वित्वाव
च्छिन्नाभाववादिनां तत्र घटाभावादिव्याप्तिग्रह एव न तत्संशयः अस्माकं त्वन्यथापीति इष्टापत्तिः प्रतियोगिते
ति प्रतियोगितासंसर्गकज्ञानस्यैव संशयविरोधित्वान्नोक्तसंशयानुपपत्तिः न चैवं घटपटोभयत्वेनोभय
वत्ताग्रहस्यापत्तिरशुद्धस्यापि शंकितत्र मिप्रायतयोर्दृष्टापत्तिसौकर्यात् द्वित्वावच्छिन्नवत्ताग्रहस्यैव प्रति
योगिताप्रकारकज्ञानस्यैव द्वित्वस्य प्रतियोगितानवच्छेदकत्वमतेऽन्यत्र प्रतियोगितासंसर्गकज्ञानस्य प्र
तिबंधकत्वेऽपि सुवचत्वाच्च घटपटद्वित्वसामान्याधिकरण्यप्रसिद्धेराह तत्सामान्येति विषयाभिलापात्

वि०त्रो
१०
10

द्वौ न स्त इति प्रतीतिविषयस्य प्रतिपादनात् । तथा च घटपटौ न स्त इति वाक्यस्य घटपटोभयवृत्तिप्रतियोगिताविषयकशाब्दबोधजनकत्वानुपगमे तादृशप्रतीतेस्तदाकारकत्वानुपपत्तेः तादृशवाक्यप्रयोज्यतादृशप्रतियोगित्वविषयकत्वापत्तिरिति भावः कथंचिल्लक्षणया । पटत्वादेर्घटाभावादिप्रतियोगितावच्छेदकत्ववारणाय व्यासज्येति । एवं चैकप्रतियोगित्वाधिकरणवृत्तित्वं न निविष्टमिति सूचयितुं व्यधीति । तादृशेति प्रतियोगितावच्छेदकताकत्वं प्रतियोगितावच्छेदकतासमानावच्छेदकताकत्वं । द्वित्वेति । एवं द्वित्वादिधर्मितावच्छेदकतापन्नतदनापन्नपर्याप्तप्रतियोगितावच्छेदकताकत्वं प्रदर्शितमिदं तु तदनापन्नमात्रपर्याप्तप्रतियोगितावच्छेदकताकत्वमिति न पौनरुक्त्यं । बोध्येति घटो नास्तीत्यादौ तत्तद्घटाभावयोरेव घटत्वावच्छिन्नप्रतियोगिताकत्वं यत्किंचिद्द्वयवृत्तित्वेन तत्त्रयस्य यत्किंचिदेकघटानधिकरणस्यैव तदवच्छेदकत्वात् इदं तु बोध्यं । अभावसामान्यविलोपापत्तिभयेन प्रतियोगिताकत्वस्य निरवच्छिन्नत्वावश्यकतया न दीधितिकृतां द्वित्वावच्छिन्नाभावव्यवस्थानासंगतिरिति । घटत्वपटत्वाद्यभावेषु सकले साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्येन तत्तदाधेयतारूपं संभवतीत्यत आह यावत्पदस्येति । ननु तत्र षष्ठ्यर्थप्रतियोगितायां नके

वत्ताधेयतासंबंधेनाभावान्वयः किंतु स्ववृत्तिभेदप्रतियोगितानवच्छेदकसाध्यनिष्ठसामानाधिकरण्य
प्रतियोगितात्वसहितेन यावत्पदोपसंदानात् तत्र च न पदोपेक्षेत्यत आह साध्येति· ननु यद्रूपं तज्जला
वृत्त्यभाववत्त्वमेव तदवच्छिन्नप्रतियोगिताकाभाववत्त्वविशिष्टं च तज्जलत्वाभाववद्वृत्त्यव्याप्तिरत आह तज्जलेति·
ननु व्यापकीभूततज्जलत्वाभावेनैव तज्जलावृत्त्यभावो नास्तीति प्रत्ययनिर्वाहा जलत्वाभावादेतादृशप्र
त्ययविषयाभाववत्त्वानुपगमेपि मूर्तत्वाभावमूर्तत्वाभावान्यतराभाववत्त्वावच्छिन्नप्रतियोगिताकाभावत्वे-
न केवलमूर्तत्वाभावे केवलमूर्तत्वाभावे वाकल्प्येपितुशक्ये तथा सति मनोगगनयोः तादृशान्यतराभावो ना
स्तीति प्रत्ययानुपपत्तेः किंत्वभावद्वयणवेति मूर्तमनस्त्वादित्यादावव्याप्तिमाशंक्य परिहरति एवमिति व्या
ख्येयेति व्याख्यानेऽभावे न प्रतियोगिनाभिन्नो यावन्तःभावप्रतियोगिक इति यावत्· तत्तद्रूपत्वेति वक्ष्यमा
णनियमानुरोधात् प्राचां ध्वंसप्रागभावयोस्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वमतेन· सहतनत्वंका
लत्वव्यापकाधिकरणताकत्वे अत्र प्रथमाभावोऽभावभिन्नत्वोपादानेपि एतज्जलान्यत्वप्रकारकप्रमाकद्भे
दात्मकभावभिन्नाभावप्रतियोगितावच्छेदकतादृशभेदजलत्वाभावान्यतराभावत्वावच्छिन्नप्रतियोगि

५ तत्तद्रूपाभावप्रतियोगि...वच्छेदकतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकतद्रूपप्रागभावध्वंसे तु तेऽसत्त्वं इत्यर्थः। दृष्टांतत्वोपादा
नं च द्वितीयाभाव एवेत्यादि रक्तत्वकल्पनाहरार्थं। ~~...तिरक्तरूपप्रतियोग~~ ५

वि॰शे॰ ११ ताकयावदभावांतर्गतजलत्वाभावस्य जलत्वासामानाधिकरण्याद्व्याप्तिर्दुरुद्धरैवेति अनायत्त्यात्तस्यापि
एतज्जलान्यजलत्वाभावरूपतास्वीकार्यैव। तथा च प्रथमाभावे भावाभिन्नत्वं व्यर्थमेवेत्याशयेन दूषयति नि
न्नेति। रूपप्रागभावो द्रूपत्वादिसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानुपगमे प्रथमाभावे सदातनत्व
स्य निरर्थकत्वेपि तदभ्युपगममते तत्सार्थक्यं दर्शयन्नेव भावाभिन्नत्वस्य प्रथमाभावविशेषणतापक्षे
पि न क्षतिरित्याशयेन कल्पांतरमवलंबते वस्तुत इति। उक्तेति। तथा च प्रथमाभावे अग्रिमरीत्या सदा
तनत्वनिवेशेपि उक्तरीत्या दोषवारणाय द्वितीयाभावेपि तन्निवेश्यमेति भावः। अंतरेति रक्तरूपप्र
प्रतियोगिकप्रागभावाद्यवगाहित्वे अंतरा रक्ते तत्प्रतीत्यापत्तिः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्य
व्याप्यवृत्तित्वोपगमेपि नवार्यत इति रक्तानधिकरणकालावच्छिन्नत्वेन तत्त्वांगीकार्यं तदपि न सकलप्रा
गभावादेस्तस्य। अंतराश्यामनिष्ठप्रागभावादेर्न स्य व्याप्यवृत्तित्वादिति किंचिदित्युक्तं द्वितीयाभावे
पि तन्निवेश्यमित्याहैवमिति। एवं चोक्तदोषवारणाय द्वितीयाभावइवेत्यनेनानपौनरुक्त्यमाशंक्य।
एवं चेति दीधितौ सकलरूपोपादानं तेजःपरमाणुरूपसंग्रहार्थं। प्रमेयत्वाभावात्वादेर्हेतुत्वे घट
३ प्रथमाभावे सदा।

भिन्नत्वप्रकारकप्रमाविषयत्वाभावादावत्यंताऽभावत्वाभावप्रकारकप्रमाविषयत्वाभावाद्दोचसाध्य
सामानाधिकरण्याभावादाहध्वंसत्वादिति॰ननुभावनिष्ठाभावंचनामतिरिक्तत्वमावश्यकं अन्यथा
गोभिन्ने गोत्वाभावेनेवगविषटत्वाद्यभावेनघटध्वंसत्वंनास्तीतिबुध्युपपादनेसर्वत्रापिईदृशरी
तिसंभवादभावभेदविलोपप्रसंगात्गोत्वाभावरूपघटध्वंसत्वाभावसत्वेपिघटध्वंसेघटध्वंसत्वं
नास्तीतिबुद्धिवारणायघटध्वंसत्वत्वावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तितायाभावश्यकत्वात्॰
तथाचकातिव्याप्तिर्यद्वाऽभावत्वप्रकारकप्रमाविशेष्यत्वाभावेघटध्वंसत्वाभावस्यतदात्मकतयात
त्रसाध्यसामान्योनाधिकरण्याभावान्नातिव्याप्तिरित्यतःसद्धेतावव्याप्तिसंभवात्तद्वारणवत्मेनाभा
वनिष्ठाभावानामतिरिक्तत्वेप्यऽतिव्याप्तिंदूषयतिवस्तुतइति॰साध्येतिधूमसमानाधिकरणध्वंस
त्वाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकेयावदंतर्गतभावत्वाद्यभावेइत्यर्थःभावत्वाद्यभा
वेध्वंसत्वाभावस्याधिकरणरूपत्वादितिभावः॰अत्रजलान्यत्वंसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावा विशिष्ट
न्यतराभावाभावत्वस्योक्तान्यतरत्वासत्वेनतस्यप्रतियोगित्वानुपपत्तिः॰प्रतियोगित्वस्याभावाभावत्व

प्रतियोगिताक३

वि॰ शो॰ रूपत्वात्तथाचोक्तरीत्याऽव्याप्तिरित्याहेवमिति॰ स्वाश्रयेतिसाध्यवद्वृत्तित्वावछेदकत्वमर्थः॰ संबंधेति॰
१२ हेतुसमानाधिकरणाभावप्रतियोगितायांसाध्यतावछेदकसंबंधावछिन्नत्वोपादानेसमवायसंबंधाव
17 छिन्नद्रव्यत्वाद्यभावमादायाव्याप्तिः॰ साध्यतावछेदकसंबंधावछिन्नद्वितीयप्रतियोगित्वोपादानेसंयो
गेनद्रव्यस्याव्याप्यवृत्तितयाऽतिव्याप्तिरतः एकसंबंधावछिन्नत्वेनप्रतियोगितयोर्निवेशः॰ एवंसं
योगेनद्रव्यस्याव्याप्यवृत्तित्वमतेप्रतियोगिताद्वयेसाध्यतावछेदकसंबंधनिवेशेपिएतद्ग्रंथसंगम
नमस्त्येव॰ परंतुजलत्वेस्नेहादित्यादौतथाविधरूपात्यंताभावप्रतियोगितावछेदकतायारूपात्यंताभा
वत्वेदीधितिकृतामभिधानासंगतिः समवायसंबंधावछिन्नप्रतियोगितायाःकेवलाभावत्वएवसं
भवात्॰ एवंजलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावान्यतराभावत्वादीनांग्रंथक
तोतदभिधानासंगतिरिति एकसंबंधावछिन्नप्रतियोगिताद्वयनिवेशएवाभिप्रेतः॥ प्रध्वंसान्य
त्वेति॰ यद्यपिप्रथमाभावेसदातनत्वस्यावश्यकतयाध्वंसात्मकहेतुसमानाधिकरणाभाववारण
संभवः॰ तथापिअनुयोगितासुयावत्वनिवेशकल्पेप्रथमाभावेसदातनत्वमनावश्यकं॰ रूपत्वाव

३ध्वंसनिष्ठाभावस्याधिकरणात्मकतयात्यंताभावत्वस्यध्वंससाधारण्यंबोध्यं३

केचित्तु मते ऽभयावृत्तित्ववैयर्थ्यं स्वरसिसाफल्यकायोजनसंभवादिति २

छिन्नप्रतियोगिताकात्यन्ताभावरूपप्रागभावसाधारणानुयोगितायां जलत्वसमानाधिकरणान्त एताद्दृ
शाभिप्राये चैवं च घटध्वंस इत्यादिकाशंकेति नचैवं तदभावमादायापि दोषवारणशंकासंगतिः भाव
वृत्यस्याभावमादायसदातनवृत्तित्वस्यतादृशानुयोगितायां सत्वात् केचित्तु मते च पश्चादुभयावृ
त्तित्वस्य वैयर्थ्यं न प्रागपि तन्निवेश्यदोषदानानौचित्यमुस्वरसः भाववृत्तिरसाविति· विशिष्टाभा
वोविशेष्यवत्तिविशेषणाभावः अन्यत्रतु विशेष्याभावरूप इतिभावः भावाभाववृत्यभावस्याति
रिक्तत्वेनाव्याप्तिः प्रसरतीत्यस्वरसः · पूरणीयमिति· अन्यथायस्ययदीयसामानाधिकरण्येत्यादिवक्त
मत्वेनस्यतदेवानौपाधिकत्वमित्यत्रानन्वयः स्यात्· तद्धर्मेति रूपांतरेण व्याप्तित्वस्यैवारणायते· नरूपेणे
ति· एतेन मूलार्थोप्युक्तः· वाधकेति शुद्धस्यतानाद्धि शिष्टस्य ज्ञानेऽभिन्नमेवेति नात्माश्रयः· सेति· यद्य
पिशैत्यं हि यत्सा प्रकृतिजेलस्येति दर्शनाद्विधेयसमानलिंगेकैनापि परामर्शः संभवति· तथापि प्रथ
मत एव निष्कृष्टलक्षणाभिधाने ऽनौचित्यमिति अनिष्कृष्टं तदभिधातव्यं· तत्र च सेत्यनेन संबंधितया
एव परामर्शोऽभिप्रेत इत्यर्थः· तदवच्छेदकेति· तद्धर्मावच्छिन्नसामानाधिकरण्यधर्मितावच्छेदकता

क३

वि०शे० पन्नतद्धर्मेत्यादिक्रमेणतज्ज्ञानस्यपक्षवृत्तितावच्छेदकतापन्नतद्धर्मावच्छिन्नसाध्यसामानाधिक
१३ रण्योपलक्षितप्रकारकज्ञानस्यवाहेतुत्वेगौरवमेव॰नन्वेवमपिधूमालोकान्यतरत्वेसाध्यसंबंधिता
वच्छेदकताग्रहःसंभवेत् निर्धर्मितावच्छेदकतद्घटकधूमत्वादिग्रहसंभवात्॰अतआहव्यर्थेति॰ए ६
वकारेणधूमत्वालोकत्वान्यतरत्वव्युदासः॰ननुविशेषणसंदेहस्यविशिष्टसंदेहाकारणत्वेमुप
सिद्धांतं इत्यतआहधर्मिवृत्तावित्ति॰पुरोवर्त्तित्वस्यैवधर्मितावच्छेदकत्वेधर्मिवृत्तित्वंधर्मिताव
च्छेदकीकृत्यधूमत्वनिश्चयसंभवादुक्तविशिष्टाभावव्यापवर्त्तकनिश्चयःसंभवतीत्यतोव्याचष्टेप
र्वतवह्निरिति॰(धूमत्वत्वादिनेति एतेनसमानप्रकारकसंशयासंभवःसूचितः॰तन्निवेशमतइति॰)
(यद्यपिव्याप्तिशरीरेहेतुतावच्छेदकस्यधर्मितावच्छेदकंनप्रविष्टमितिविशिष्येवतन्निश्चयः॰सुव
(चः॰नचोपस्थितधूमत्वाभावादेस्तत्रभानसंभवः॰निर्धर्मितावच्छेदककसंशयस्यालीकतयाध)
(र्मितावच्छेदकभासकविरहेतन्निश्चयसंभवात्॰प्रकारतावच्छेदकांशेरक्तारक्तदंडवानितिसंश)
(यस्यनिराकृतत्वाच्च॰तथापिव्याप्तिघटकहेतुतावच्छेदकविशिष्टवत्तासंशयोदुर्वारएव॰दर्शित)

अत्र दीधितिकारैर् इत्यादौ संदेहेपीत्यादिना व्याप्तिग्रहः उपपादितः स चासंगतः तथापि हेतुतावच्छेदकसंदेहाधीनस्य पक्षे विशिष्टहेतुसंग्रह
स्य दुर्वारतया परामर्शानुपपत्तेः अत एवाभासे पक्षे विशिष्टहेतुसंदेह एव निर्भरः अतो वैयधिकरण्येनेत्यादाविवास्य विशेषणसंदेहस्य ल
परतां संदेहेपीत्यस्य पक्षे विशिष्टहेतुसंदेहपरतां च प्रदर्श्य सामान्यत इत्यादेः पक्षे विशिष्टहेतुनिश्चयपरतां स्फुटीकरोति इत्यादावित्यादिना। धू
मत्वत्वादिना धूमत्वसंदेहो नास्त्यरूपतो धूमत्वप्रकारेण धूमसंदेहानुदयादुक्तं विशेष्येति संदेहेपीति तादृशनिश्चयस्य संशयाप्रतिबध्यत्वार्थ
।सामान्यधर्मेति आलोकत्वादिरूपव्याप्यतावच्छेदकांतरसाधारणेत्यर्थः।धूमत्वत्वादिना धूमत्वादिसंशयेन सामान्यरूपविशिष्टविशेषणनि
श्चयविरहेपीति तादृशविशेषणावत्त्ववृत्तिकत्वरूपतद्विशिष्टाभावव्यावर्तकस्य धर्मिणि निश्चयसंभवान्न तादृशविशेषणाविशिष्टाभावभान
संभव इति भावः। तन्निवेशेति। वक्ष्यमाणपारिभाषिकावच्छेदकत्वविशिष्टविशिष्यधूमत्वादिनिश्चयस्य सामान्यघटितविशेषणावगाहित
या विशिष्यधूमत्वादिसंशयस्य न तत्सामान्याभावावगाहित्वेन तद्विघटकत्वादिति भावः। यद्यपि परामर्शे धूमभेदकोटिकस्वरूपतो धूमत्वकोटि
कत्वेनायमेवमाक्षेपः तथापि विशिष्यपदसंगतये इत्थं व्याख्यातं। धूमभेदज्ञानस्य सामान्यतो धूमत्वनिश्चयाविघटकत्वात् कथनं तस्य विष
यसाध्याभावादपि स्फुटतया। परामर्शे च विशिष्यधूमत्वसंशयोपादाने संदर्भविरोधं दर्शयिष्यतीति ध्येयं। आद्य इति उभयत्रेति च तथा च प्र
थमकल्पे वह्निमान् प्रमेयादित्यादौ प्रमेयत्वस्य वह्निसामानाधिकरण्यान्न्यूनवृत्तित्वादतिव्याप्तिः वह्निमान् धूमादित्यादौ धूमत्वस्य तन्न्यूनवृत्ति
त्वादव्याप्तिश्चेति द्वितीयकल्पेऽतिव्याप्त्यसंभवादव्याप्तिरेक एव दोष इत्यर्थः। व्याप्यतावच्छेदकत्वं व्याप्तिघटकत्वे सति व्याप्यतान

वि० ३०
ग० टी०
१३
13

तिरिक्तवृत्तित्वसत्त्वेनोपादानान्न तद्धूमत्वादौ धूमत्वं रूपव्याप्यत्वावच्छेदकत्वमिति सूचनाय तत्तद्देवेति। अत्र दृष्टान्तमाह व्यापकेति। समाना
धिकरणवृत्तिहेतुतावच्छेदकस्य व्याप्तित्वेन तथाविधमेयत्वाद्यवच्छेदकत्वं मेयत्वादेः संभवतीति भावः। उक्तव्याप्तौ दोषमाह एवं चे
ति। कारणीभूतज्ञाने मेयत्वस्य धर्मितावच्छेदकत्वेऽपि व्याप्यतावच्छेदकत्वाभावात् कथं तथा प्रयोग इत्याशङ्क्य व्याप्यतायाः पंचम्यर्थतां नि
राकृत्याशयं विवृणोति अयमिति। साध्येत्यनुमितिजनकभ्रमान्यज्ञानविषयतापंचम्यन्तार्थः। व्याप्तिपक्षधर्मताविषयकेति स्वरूप
कीर्तनं प्रमात्वग्रहेति। व्याप्तौ तद्रूपव्यभिचारज्ञानोत्तरं दोषविशेषादिमहिम्ना तद्रूपव्यापकताज्ञानेऽपि तत्रव्यापकताप्रकारतायां व्य
भिचारविशेष्यताकत्वग्रहस्यैव सत्त्वादिति भावः। तथा च व्याप्तिग्रहप्रमात्वग्रहे चागमकताप्रमात्वविशिष्टविषयता। एतच्च व्या
प्तिविशिष्टविरहिवृत्तितया ग्रहप्रमाणेति योजनामभिप्रेत्य। वस्तुतस्तु न प्रथम इत्यादिना हेतुवाक्यसमासात्मकबोधानुपपत्तिरेवाभिहि
ता। एवं च वृत्तितयेत्यंतं रूप एवान्वेति। व्याप्तिग्रहे तस्य व्याप्तिप्रमेत्यर्थः। तथा च व्याप्तिग्रहस्य प्रमात्वासंभवात् व्याप्तिप्रमाविषयताव
च्छेदकत्वानुपपत्तिरिति सूक्तं। एतेन विशेषदर्शनविरहदशायां तादृशग्रहः संभवतीति दूषणं प्रत्युक्तं॥

हेत्व
१३

विशिष्टसंशयनिर्वाहकसत्वात्· विशेषणाभाववत्वेनाज्ञायमानविशेष्यसंबंधाज्ञानस्यविशेष्य
संबंधज्ञानसहितस्यविशिष्टसंशयहेतुतायाअग्रेवाच्यत्वाच्च· एतादृशाक्रमेणनिश्चयात्मकपराम
र्शासंभवोबोध्यः· आद्यइति उभयत्रेतिच· नथाचप्रथमकल्पेवह्निमान्प्रमेयादित्यादौप्रमेयत्वस्यवह्नि
सामानाधिकरण्यान्यूनवृत्तित्वादतिव्याप्तिर्वह्निमान्धूमादित्यादावव्याप्तिश्च धूमत्वस्यन्यूनवृत्ति
त्वादिति द्वौदोषौ द्वितीयकल्पेतुअतिव्याप्त्यसंभवादव्याप्तिरेकएवदोषइत्यर्थः· प्रमात्वग्रहासंभवा
दितिग्रहपदंसंपाततायातंव्याप्यवच्छेदकतानिष्ठसंसर्गावच्छिन्नविषयतांपक्षीकृत्यव्याप्यनवच्छेद
कनिष्ठविषयतानिरूपितत्वंसाध्यं· व्याप्यतिरिक्तवह्निविषयतानिरूपितत्वंहेतुः· सामान्यमुखीव्या
प्तिः· कारणतातिरिक्तवह्निविषयतानिरूपितकारणतावच्छेदकताविषयतादृष्टान्तः· इयंसंबंधाव
च्छिन्नावच्छेदकत्वविषयतानिरूपितविषयताव्याप्यनवच्छेदकवह्निर्व्याप्यतिरिक्तवह्नित्वादितिवा·
तादृशभ्रमत्वसिद्ध्याप्रमात्वासिद्धेरितिवार्थः· एवंचविशेषदर्शनस्यभ्रमतयाहेतुप्रयोगोपपत्तेःप्र
मात्वाभावपर्यन्ताभिधानंसंगतिः· नथाचेति· अतिरिक्तवह्नितोग्रहस्यग्राह्याभावानवगाहित्वेपिस्व

५ धूमत्वविशिष्टसत्तासंग्रहाय। अन्यथा तत्त्वस्य तादृशगुणान्यत्वघटितत्वादव्याप्तेः न च गुणान्यत्वस्य कालिकदैशिकसंबंधाऽपादित्व
५ त्वसंबंधतायामवच्छेदकत्वमेवेति वाच्यं। साध्यसंबंधितायां हेतुतावच्छेदकसंबंधावच्छिन्नत्वस्योक्तत्वात्। एवं धूमस्य साध्यसंबं

वि० टी० (रूपसंबंधरूपावच्छेदकताग्रहप्रतिबंधकताया स्तर्के वक्ष्यमाणत्वात्। नतिरिक्तवृत्तित्वमिति पाठः)
१४ (नतिरिक्तवृत्तित्वेनेति पाठश्च स्तु योज्यः। आद्येऽवच्छेदकताघटकस्वस्य द्वितीयेऽवच्छेदकत्वस्यैव वि)
(शेषणीयत्वात्। आद्ये एकवृत्तित्वानिवेशाल्लाघवं। द्वितीये उभयत्वाविशेषितोभयस्य लक्षणत्वेनु)
साम्यमिति।) वन्हिमान् धूमादित्यादौ तद्व्यक्तित्वादिकमेव तादृशधर्म इति धूमत्वे लक्षणसमन्वयः।
अतिव्याप्तिं वारयति नीलधूमत्वादेरिति। तादृशत्वं साध्यसंबंधितावच्छेदकत्वं। एतच्च गुणेऽ धूम
त्वविशिष्टसत्तासंग्रहार्थं ननु तादृशपदेन सत्तात्वस्य वारणेऽपि गुणान्यत्वस्यावारणप्रसंगः
स्वाश्रयसमवेतत्वसंबंधेन तद्विशिष्टस्य समवायेन व्याप्यतया तस्यापि साध्यसंबंधितावच्छेद
कत्वात्। यदि च तद्घटितसत्तात्वस्य व्याप्यतावच्छेदकत्वमपलपनीयमेव। अत एव केवलान्वयिग्रंथे सा
ध्याभाववदवृत्तित्वरूपव्याप्तिलक्षणे द्रव्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिमनुपन्यस्य दीधितिकृद्भिः
नीलेतररूपवान् नीलासमवेतत्वे सति गोत्वादित्यादौ सोपन्यस्तात तदा तादृशपदवैयर्थ्यमिति चे
न्न नीलासमवेतत्वविशिष्टगोत्वत्वस्य नीलेतररूपव्याप्यतावच्छेदकत्वनिर्वाहार्थमेव तादृशप

[illegible] १४

पादानाभावे न प्रकृते धूमप्रागभावत्वाद्यसंग्रह इत्यतो दीधितावादिपदं धूमविशिष्टेत्यसमत्वादित्याहकं ५

दस्यावश्यकत्वात्· नहि तत्र नीलासमवेतत्वविशिष्टस्य व्याप्यत्वसंभवः शब्दज्ञानादिसाधारणत्वात्·
धूमत्वप्रतीतेर्न नीलधूमत्वाविषयकत्वमिति स्वपर्याप्तविषयताशून्यत्वं वाच्यं तथा सति गौरवादाह
स्वावृत्तीति· धूमप्रागभाववत्त्वादेरिति अथ नीलेतरत्वविशिष्टद्रव्यत्ववान्॥ नीलेतरगोत्वात्· इत्यादौ नी
कालवृत्ति लेतरत्वेत्वं कालिकसंबंधावच्छिन्नसाध्यसंबंधितयाऽवच्छेदकं तद्वदितत्वमेव च हेतुतावच्छेदकमि
त्यव्याप्तिवारणाय हेतुतावच्छेदकसंबंधावच्छिन्नायाः साध्यसंबंधितया विवक्षणीयत्वं तथा धूमप्राग
भाववत्त्वादिसंग्रहसंभवात् सामानाधिकरण्यं व्यर्थमिति चेन्न· धूमविशिष्टरासभत्वादेरादिपदसंग्राह्य
स्यस्य धूमध्वंसविशिष्टधूमप्रागभाववत्त्वादेः कालिकसंबंधेन वह्नेः साध्यत्वे तेनैव संबंधेन धूमप्रागभाव —
स्य हेतुत्वे केवलधूमप्रागभाववत्त्वस्य च संग्रहाय तदुक्तेः· स्वीयेति· कालिकादिसंबंधेन नीलधूमत्वप्रका
रकप्रतीतिवारणाय· वह्न्यभाववत्त्वेति· अथैवमपि वह्निमद्भिन्नत्वप्रकारकप्रमाविषयत्वाभाववत्त्वात्ता
दात्म्येन हेतुतायामव्याप्तिः· अत्र वदंति· तादृशधर्मांतरस्य येन संबंधेनावच्छेदकत्वं तेन संबंधेन तद्
दघटितस्वत्ववत्त्वाधिकविकासकत्वान्यतरवत्त्वस्वलक्ष्यानियामकत्वोपगमान्न दोषः· एवं च पर्ये

१ एवं वाच्यं न्ने पादित्यादौ विषयतासंबंधेन ज्ञानमिव ज्ञानविषयतापि तस्यैवेति ॥ विकासकत्वात् । वह्निभिन्नधर्मिसंपादकत्वात् । यत्तु वह्निमान् धूमसत्ताभावाभावादित्यादौ प्राचां मते हेतुतावच्छेदकस्य धूमत्वप्रागभावतत्ध्वंसवृत्तितया विकासकत्वात् तद्दोषकुतो नोक्तं १

दि० श० क्तस्थले तदघटितस्वत्ववत्वाभावादलक्ष्यतैवेति (विकासकत्वात् वह्निभिन्नधर्मिसंपादकत्वात् । यत्तु वह्नि

१५ (मान् धूमात्सत्ताभावाभावादित्यादौ प्राचां मते हेतुतावच्छेदकस्य धूमत्वप्रागभावतद्ध्वंसवृत्तितया विकास

कत्वात् तत्रासंग्रहः) तस्य तादृशधूमत्वघटितत्वात् । न चोक्तत्रितयसाधारणहेतुतावच्छेदकसंबंधाभावे

न तत्संग्रहः प्रकारोऽयमर्थ इति वाच्यं । महाकालानुयोगिकविशेषणताविशेषस्यैव तादृशसंबंधत्वात् तन्न । प्रा

चीनैरपि विशेषणरूपेण संबंधतायाः अनुपगमात् । विशेष्यविधयेति तथाविधधर्मान्तरमुख्यविशेष्यता

शून्यप्रतीतिमुख्यविशेष्यत्वमर्थः । प्रथममुख्यत्वोपादानात् वन्ह्यभावप्रमाविषयत्वाभावसंग्रहः । नील

धूमत्ववारणाय द्वितीयमुख्यत्वनिवेशः । धूमान्यान्यत्वादेरिति एतस्य धूमत्वरूपतापक्षेपि गौरवेण तादृ

शभेदत्वादिनाऽवच्छेदकत्वमनिष्टमेवेति बोध्यं । यादृशधर्ममिति । व्यापकस्वघटकेति । स्वाश्रयप्रकारिता

शून्यप्रतीत्यवृत्तिस्वनिरूपितप्रकारिताकस्वावृत्तिविषयताश्रयत्वविशिष्टसाध्यसंबंधितावच्छेदक

त्वं यादृशधर्मव्यापकतावच्छेदकं तादृशत्वमर्थः । आद्यं स्वपदं न्यपदार्थपरं । उत्तरस्वपदद्वयं तु यत्वं च या

दृशधर्मपरं । यादृशधर्मव्यापकतावच्छेदकत्वं च यादृशधर्मवद्वृत्तिमन्निष्ठभेदप्रतियोगितानवच्छे

15

२५

१साध्यसंबंधितावच्छेदकत्वावछिन्नधूमत्वस्य यादृशधर्मवन्निष्ठासंताभावप्रतियोगितेपि १

दकत्वं. तेनैव धूमगगनाद्यन्यतरत्वादेर्व्याप्यतावच्छेदकत्वापत्तिः न च साध्यसंबंधितावच्छेदक
त्वेन धूमत्वाभानेपि नीलधूमत्वभानाद्व्याप्तिरितिवाच्यं. स्वाश्रयत्वस्योपलक्षणे तयातत्प्रका त्वात् स्वा
वत्तिस याद रकप्रतीत्यवृत्तित्वप्रकारिताकवृत्तित्वस्यैतादृशसाध्यसंबंधितावच्छेदकत्वेवाच्यत्वात्. एवं व्यापक वा
श धर्म २ त्वप्रवेशेपि द्रव्यं मूर्तं विभुभिन्नत्वे सति द्रव्यादित्यादौ संयोगेन हेतुतायां विभुभिन्नत्वविशिष्टद्रव्यत्वे
स्वघटकद्रव्यत्वस्य समवायसंबंधावछिन्नसाध्यसंबंधितावछेदकत्वेन तद्व्यापकत्वाद्व्याप्तिः एवं व
ह्निमान् वह्निमन्यासंयुक्तवत्वे सति संयुक्तप्रागभावादित्यादौ हेतुतावच्छेदकत्वे स्वघटकस्याभावव
ह्निमदन्यासंयुक्तत्वस्य संयोगेन साध्यसंबंधितावच्छेदकतयात द्व्यापकत्वाद्व्याप्तिरतः हेतुताघट
कसंबंधावछिन्नसाध्यसंबंधितानिवेश्याः स्वव्यापकतावच्छेदकतादृशसाध्यसंबंधितावच्छेदकत्वा
स्वभिन्न धिकरणं धर्मविषयकप्रतीतिनिविषयत्वे तादृशधर्मापर्याप्तविषयतापर्याप्त्याश्रयत्वपर्यवसितेनु)
(योगिनिस्वत्वनिवेशापत्तिः न तथा सति वह्निमान् धूमादित्यादौ धूमत्वापर्याप्तधूमत्वद्रव्यत्वोभय)
(पर्याप्तविषयताविशिष्टसाध्यसंबंधितावछेदकत्वरूपव्यापकतावछेदकाश्रय केवलधूमत्वमादा)
३सत्वपर्यवसितेतस्य धूमत्वे सत्वेन नीलधूमत्वेऽतिव्याप्तिः विशिष्टानतिरिक्तादिति प्रतियोगित्वसत्वप्रवेशः।

वि॰ प्र॰ (यासंभवापत्तेः) नीलधूमत्ववारणाय विषयकत्वकूटस्य निवेशनीयत्वात् ततः स्वघटकेत्यादिक्रमेणा
१६ भिधानं। यादृशयादृशोल्लिखि विवक्षितं। अन्यथा नीलधूमत्वघटकधूमत्वनिष्ठसाध्यसंबंधितावच्छेद
16 कतायाः कपिशधूमत्वव्यापकतावच्छेदकतया नीलधूमत्वादावतिव्याप्तेः। अथ साध्यसंबंधिताव
च्छेदकत्वं स्वविशिष्टाधिकरणवृत्तियावत्साध्यासामानाधिकरण्यकत्वरूपं स्वत्वघटितत्वादननुग
तमिति धूमालोकान्यतरत्वस्य कथं वारणं। मैवं। साध्यसामानाधिकरण्याभावव्यापकीभूताभाव
प्रतियोगितावच्छेदकघटकसामानाधिकरण्यनिरूपकतावच्छेदकत्वस्यानुगतत्वात्। वस्तुतस्तु
सकलधर्म साध्यसंबंधितावच्छेदकत्वेत्यनेन तादृशावच्छेदकं पर्याप्तप्रकारता विवक्षणीया। स्वव्यापकतावच्छे
दकीभूतसाध्यसंबंधितावच्छेदकतावच्छेदकस्वापर्याप्तप्रकारतानिरूपकत्वशून्यप्रतीत्यवृत्तिर्या
दृशधर्मनिरूपितप्रकारिताऽतादृशत्वं वा समुदायार्थः। अत्र घटकपर्याप्तप्रकारताया एव विशिष्यप्र
वेशान्नोक्तरीत्या दोषः। एवं च वाच्यं ज्ञेयादिस्थले विषयतासंबंधेन ज्ञानादिकमेव वाच्यत्वव्याप्यता
वच्छेदकं ननु ज्ञेयत्वादितस्य ज्ञानविषयतात्मनो ज्ञानघटितत्वेन नीलधूमत्वसमत्वात्तु इत्यव)

५ साक्षादनवच्छिन्ननिवेशे ५

ध्येयं॰ केचित्तु स्वसमानाधिकरणत्वं न स्वव्यापकत्वं किंतु तद्घटितत्वं तादृशधर्मानवच्छिन्नविशेष्य
तानिरूपितप्रकारत्वमेव॰ एवंच धूमात्यंताभावाभाववत्वादेः तादृशधूमत्वाद्यनवच्छिन्नविशेष्यता एवंच
निरूपितप्रकारताश्रयत्वतया नाव्याप्तिः॰ एवमेव धूमप्रागभावधूमध्वंसान्यतरस्यादित्यादौ तत्ता
दृशान्यतरत्वादावप्यूह्यं॰ यदि च धूमात्यंताभावाभावनिष्ठविशेष्यताया अपि परंपरया धूमत्वा साक्षाद्
वच्छिन्नत्वमेव॰ एवंच धूमप्रागभावत्वावच्छिन्नविशेष्यतायां धूमत्वावच्छिन्नत्वात्समानाधिकरण
पदवैयर्थ्यं वोच्यते तदा स्वभिन्नो यस्तादृशधर्मः तदवच्छिन्नत्वं न तत्समानाधिकरणत्वेन दुभयाभाव [illegible]पर्य्याप्ते द्विस्पृद्द
वद्विशेष्यतानिरूपितप्रकारताश्रयत्वस्य समुदायार्थत्वात्॰ प्रकृते च धूमतद्ध्वंसादिनिष्ठविशेष्यता
नैकामानाभावादिति धूमनिष्ठविशेष्यतायाः धूमत्वसामानाधिकरण्येपि तद्ध्वंसादिनिष्ठविशेष्य
तायाअतथात्वेन तामादायैव लक्षणसंगतिः॰ अत एव समानाधिकरणपदमप्यर्थवत्॰ यदि च
तत्रापि विशेष्यता एकैव धूमात्यंताभावाभावत्वस्यैक्यादिति मन्यते तदा तदवच्छिन्नत्वं तद्व्याप्यत्वो
भयाभाववा एव विशेष्यतायां निवेश्यः समानाधिकरणपदस्य व्याप्यत्वनिवेशफलकत्वात्॰ एवंचवा

=ज्ञानघटितैतत्संबंधेन=३

वि० प्र० च्यं प्रमेयात् ज्ञेयादित्यादौ प्रमेयत्वाद्यवच्छिन्नविशेष्यतायाः प्रमात्वावच्छिन्नत्वतत्सामानाधिकरण्योभ
१८ यवत्त्वेपि तद्व्याप्यत्वाभावान्नाव्याप्तिः नीलधूमत्वाद्यवच्छिन्नविशेष्यतायाश्च धूमत्वाद्यवच्छिन्नतया
17 नातिव्याप्तिः यदि च नियतसमूहालंबनविषयतद्व्यक्तित्वविशिष्टतद्व्यक्तित्वेऽतिव्याप्तिः तद्घटक
तद्व्यक्तित्वस्य स्वाविषयकप्रतीतिविषयत्वासंभवादित्युच्यते तदा स्वानवच्छिन्नविशेष्यतावच्छेदक
त्वमेवांतरपदेन वाच्यं तादृशतद्व्यक्तित्वानवच्छिन्नविशेष्यतावच्छेदकत्वस्य तद्व्यक्तित्वे सत्त्वान्न दोष
इति प्राहुः यदि च तद्व्यक्तित्वद्वयावच्छिन्नविशेष्यतापि प्रामाणिकी तदा स्वापर्याप्तविषयतापर्याप्त्याश्र
यत्वमेव समुदायपर्याप्तिः प्रत्येकपर्याप्तौ उपगमस्य स्वानुयोगिकपर्याप्त्यनवच्छेदकावच्छिन्नविषय
त्वीयपर्याप्त्याश्रयत्वं विवक्षणीयं अन्ये तु स्वानवच्छिन्नविशेष्यतावच्छेदकीभूततादृशधर्माभाववन
द्विशेष्यतावच्छेदकत्वमर्थः तादृशधर्माभावश्चावच्छिन्नत्वसामानाधिकरण्योभयसंबंधावच्छिन्न
प्रतियोगिताको बोध्य इत्याहुः परे तु स्वानवच्छिन्नविशेष्यतावच्छेदकीभूततादृशधर्मानवच्छिन्न
विशेष्यतावच्छेदकं स्वमित्यर्थः तादृशधर्मस्य साक्षादवच्छेदकत्वं विवक्षितं समानाधिकरणपदं १८

चैतन्नाभावेवन्नचमेवह्नेतुकेस्यानवच्छिन्नत्वाप्रसिद्धिः मेयत्वेनमेयानवच्छिन्नत्वप्रसिद्धेरित्या
18 हुः नव्यमतिप्रसक्तमेवच्छेदकमितिमूलस्यावच्छेदकशब्दबोध्यंनातिप्रसक्तमितियोजनयादीधि
तिकारमतेऽवच्छेदकपदार्थप्रदर्शकत्वान्नविरोधः उपाधेरैवावच्छेदकतावाधस्याभिधेयतया वामि
कोटीति तद्विरोधीति स्वविशिष्टसमानाधिकरणतद्विरोधिकत्वादित्यर्थः तथाचस्वविशिष्टाधि
करणवृत्त्यभावप्रतियोगितावच्छेदकत्वं तत्सामानाधिकरण्यावच्छेदकत्वाभावव्याप्यमितिनियमः यथा यतो
श्रुते विशिष्टसत्तात्वेद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वंनस्यात्तद्व्यात्वाभावसामानाधिकरण्या
नतिप्रसक्तत्वादित्तिदोषस्यानावकाशः विषयविरोधादिति तथाचविरुद्धत्वाग्रहेपिप्रतिबंधस्या
नुभविकत्वमित्यभिमानः यद्वाविरुद्धत्वग्रहोनियतइत्यभिमानः वस्तुतस्त्वित्यादिस्तुतदनेयत्यम
भिप्रेत्य उक्तव्यभिचारधीद्वारेति यावच्छिन्नाधिकरणवृत्तिसाध्याभावकत्वरूपलिंगोस्थापनादि
तिभावः इतिविशेषनिरुक्तिः

वि० प्रे०
२८